# संस्कृतबालादर्शे षड् विंशः पाठः ॥ २६ ॥

## चैत्रो मैत्रश्च

तथापि = even then, then also, ततः प्रभृति = since then, स्वयमेव = by oneself only, सद्य एव = immediately.

आचार्य रामतीर्थस्य चैत्रो मैत्रश्चेति (चैत्रः मैत्रः च इति) द्वौ शिष्यौ आस्ताम्। तौ गुरोः गृहस्य समीपे द्वयोः कोष्ठयोः न्यवसताम् ॥
एकदा गुरुः तयोः बुद्धिचातुर्यं परीक्षार्थं ताभ्यामेकैकं (ताभ्यां एकं एकं) रूप्यकं दत्त्वा अकथयत् " इदमत्यल्पं धनम् (इदम् अति अल्पम् धनम् this is very little monoy) ।

तथापि येन युवयोः कोष्ठौ पूर्येयातां (they two will be filled) तादृशं (such like) किमपि वस्तु क्रीत्वा आनयतम् " - - इति ॥

चैत्रः सद्य एव (सद्यैव) कस्यापि कृषीवलस्य गृहं गत्वा तेन धनेन पलालं क्रीतवान्। ततः स स्वयमेव तदानीय तेन कोष्ठं पूरयित्वा गुरवे न्यवेदयत् - - ”आर्य ! पूरितोऽयं कोष्ठः” - - इति। गुरुः सविषादं (sadly), त्वया न साधु कृतम् इत्यवदत् (इति अवदत) ॥

मैत्रः विपणिं गत्वा दीपमेकम् आनयत्। स तं प्रज्वाल्य कोष्ठे निधाय गुरवे न्यवेदयत्। - - " आर्य ! पूरियितोऽयं कोष्ठः" इति। गुरुः सहर्षं शिरः कम्पयन्,

साधु कृतम् , इत्यभिनन्दत् (इति अभि अनन्दत् thus praised and approved) ।

ततः प्रभृति उपाध्यायस्य मैत्रे प्रीतिरवर्धत । पश्यत ! मैत्रस्य बुद्धिचातुर्यम् ।

**क) प्रश्नाः - - -**

१. चैत्रो मैत्रश्च कस्य शिष्यौ ?

चैत्रो मैत्रश्च आचार्य-रामतीर्थस्य शिष्यौ आस्ताम् ।

२. तौ कुत्र न्यवसताम् ?

तौ शिष्यौ आचार्यस्य गृहस्य समीपे द्वयोः कोष्ठयोः न्यवसताम् ।

३. गुरुः तयोः परीक्षार्थं किमकरोत् ?

गुरुः तयोः परीक्षार्थं ताभ्यामेकैक रूप्यकं दत्वा अकथयत् 'येन धनेन युवयोः कोष्ठौ पूर्येयातां तादृशं किमपि वस्तु क्रीत्वा आनयतम्' इति ।

४. चैत्रः कुत्र गत्वा किं क्रीतवान् ?

चैत्रः कस्यापि कृषीबलस्य गृहं गत्वा तेन धनेन पलालं क्रीतवान् ।

५. स किं कृत्वा गुरवे किं न्यवेदयत् ?

स चैत्रः स्वयमेव पलालं आनीय तेन कोष्ठं पूरयित्वा गुरवे न्यवेदयत् 'पूरितोऽयं कोष्ठः' इति उक्तवान् ।

६. चैत्रस्य प्रवृत्तिं दृष्ट्वा गुरोः किमभवत् ?

चैत्रस्य प्रवृत्तिं दृष्ट्वा गुरुः " विषादं, त्वया न साधु कृतं " इत्यवदत् ।

७. मैत्रः कुत्र गत्वा दीपमानयत् ?

मैत्रः विपणिं गत्वा दीपमेकं क्रीत्वा आनयत् ।

८.	स किं कृत्वा गुरवे किं न्यवेदयत् ?

स मित्रः विपणिं गत्वा दीपमेकं क्रीत्वा आनयत्। कोष्ठे प्रज्वाल्य गुरवे न्यवेदयत् - 'आर्य ! पूरितोऽयं कोष्ठः ' इति उक्तवान्।

९. गुरुः सहर्षं शिरः कंपयन् किमवदत् ?

गुरुः सहर्षं शिरः कम्पयन्, साधु कृतम्, इत्यभ्यनन्दत्।

१०.	ततः प्रभृति गुरोः कस्मिन् प्रीतिरवर्धत ?

ततः प्रभृति गुरोः मैत्रे प्रीतिरवर्धत।

**ख)** आचार्यः ; गुरुः ; उपाध्यायः ; (अध्यापकः) *m* teacher (words of similar meaning)

**ग) समानशब्दाः - - -** कीदृशः , तादृशः , ईदृशः , एतादृशः , मादृशः , त्वादृशः , अस्मादृशः , युष्मादृशः , भवादृशः।

**घ)** 'कतिपय' शब्दस्य रूपैः वाक्यानि पूरयत।

'कतिपय' शब्दस्य , 'सर्व' शब्दवत् रूपाणि।

१. अस्मिन् उद्याने - - - - -वृक्षाः फलैः पूर्णाः शोभन्ते।

अस्मिन् उद्याने <u>कतिपये</u> वृक्षाः फलैः पूर्णाः शोभन्ते।

अस्मिन् उद्याने <u>सर्वे</u> वृक्षाः फलैः पूर्णाः शोभन्ते।

२. अहं गृहं गच्छन् तटाके - - - - -मण्डूकान् अपश्यम्।

अहं गृहं गच्छन् तटाके <u>कतिपयान्</u> मण्डूकान् अपश्यम्।

अहं गृहं गच्छन् तटाके सर्वान् मण्डूकान् अपश्यम्।

३. अस्मिन् वृक्षे - - - - - फलानि पक्वानि वर्तन्ते।

अस्मिन् वृक्षे कतिपयानि फलानि पक्वानि वर्तन्ते।

अस्मिन् वृक्षे सर्वाणि फलानि पक्वानि वर्तन्ते।

४. - - - - - सहपाठिनः अस्मिन् भवने निवसन्ति।

कतिपये सहपाठिनः अस्मिन् भवने निवसन्ति।

सर्वे सहपाठिनः अस्मिन् भवने निवसन्ति।

५. अत्र - - - - -तरुषु पक्षिणः वासं कुर्वन्ति।

अत्र कतिपयषु तरुषु पक्षिणः वासं कुर्वन्ति।

अत्र सर्वेषु तरुषु पक्षिणः वासं कुर्वन्ति।

ङ) गत्वा , क्रीत्वा , पूरयित्वा - - इमानि 'कृत्वा' प्रत्ययान्तनि अव्ययानि ॥

(क्रीत्वा, गत्वा, पूरयित्वा)

च) अस्मिन् पाठे ल्यबन्तानि अव्ययानि वद ॥

प्रज्वाल्य

छ) Split: 1. कस्यापि = कस्य +अपि, 2. पूरितोऽयं = पूरितः + अयं

3. हस्तेऽर्पितवान् = हस्ते + अर्पितवान्

## शब्दसंग्रहः śabdasaṅgrahaḥ = Vocabulary

तथापि *in.* even then

ततः प्रभृति since then

स्वयमेव *in.* oneself

सद्य एव *in.* immediately

न्यवसतां *P.* they two lived

कोष्ठः *m* room

पूर्येयातां *P.* they two will be filled

तादृशं *a.n.* such like

पलालं *m. n.* straw

निवेद्य *in* having informed

सविषादं *in.* sadly

कम्पयन् *a.m.* Shaking *a.m.*

अवर्धत *A.* increased

अभ्यनन्दत् *P.* praised, approved

पश्यत *P.* look at

क्रीत्वा *in.* having brought